श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री गरुडतन्त्रे हनुमत्कल्पे ईश्वर प्रोक्तं

# ॥ श्री हनुमत्स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हनुमत्स्तोत्रम् ॥

अत्युत्कटप्रकटितातुलधैर्यवर्यः
श्रीरामकार्यकरणे प्रथितैकवीरः।
गत्वा विलङ्घ्य गतवारिधिवारितीरः
श्रीमानसौ जयति वायुसुतो हनूमान् ॥ 1 ॥

यो जातमात्रसमये बलवान् गभस्ते -
र्बिम्बं निरीक्ष्य फलमित्यविचार्य सम्यक्।
जग्राह पाणियुगले सहसा मुमोच
श्रीमानसौ जयति वायुसुतो हनूमान् ॥ 2 ॥

बिभ्रत्सदा वपुषि वज्रचये बलीयान्
तेजः सहायसमयं प्रकटीचकार।
लङ्कां ददाह दशवक्त्रसभासमक्षं
श्रीमानसौ जयति वायुसुतो हनूमान् ॥ 3 ॥

रामानुजे महति यो जगतीतलेऽस्मिन्
शक्त्या हते रणमुखे दशकन्धरेण।
आनीय भेषजमजीवयदेवमाशु
श्रीमानसौ जयति वायुसुतो हनूमान् ॥ 4 ॥

मुद्रां समर्प्य रघुनन्दननामचिह्नां
चूडामणिं जनकराजसुतागतं तम्।
आनीय राममभिवेदयति स्म वीरः
श्रीमानसौ जयति वायुसुतो हनूमान् ॥ 5 ॥

निघ्नन्नशोकवनभूरुहरक्षपालान्
भञ्जन् महाबहुपशूंश्च शतं सहस्रान्।
भुञ्जन् फलानि विविधानि हि वीक्ष्य सीतां
श्रीमानसौ जयति वायुसुतो हनूमान्॥ 6॥

कारागृहे मनसि चिन्तित एव यस्मिन्
बद्धो जनो हि लभते तत आशु मोक्षम्।
क्रव्यादयक्षपवनादिभयापहारी
श्रीमानसौ जयति वायुसुतो हनूमान्॥ 7॥

तुभ्यं नमः सकलमङ्गलदायकाय
तुभ्यं नमोऽस्तु पवनानलसम्भवाय।
तुभ्यं नमोऽस्तु जगतां परमोपकर्त्रे
सर्वार्तदुःखहरणाय नमो नमस्ते॥ 8॥

इदं हनूमतः स्तोत्रं महापातकनाशनम्।
सङ्ग्रामजयदं पुण्यं देवानामपि दुर्लभम्॥ 9॥

यः पठेत् प्रातरुत्थाय स्नाने वा शयनेऽथवा।
विषं न बाधते तस्य न तं हिंसन्ति हिंसकाः॥ 10॥

विद्यार्थी लभते विद्यां धनार्थी लभते धनम्।
पुत्रार्थी पुत्रमाप्नोति नारी पत्युः प्रिया भवेत्॥ 11॥

रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बन्धनात्।
दुर्बलो बलमाप्नोति भवेद्वायुसुतोपमः॥ 12॥

विघ्नाः सर्वे पलायन्ते
तं दृष्ट्वा नात्र संशयः।
सङ्ग्रामे व्यवहारे च

विजयस्तस्य जायते।
बन्धनान्मुक्तिमाप्नोति
यात्रायां सिद्धिरेव च॥ **13**॥

॥ श्री हनुमत्स्तोत्रं समाप्तम्॥